# chatuHShaShTilIlAstutiH by Nilakantha Dikshita

# શ્રીનીલકણ્ઠદીક્ષિતપ્રણીતા ચતુઃષષ્ટિલીલાસ્તુતિઃ

## Document Information

Text title : chatuHShaShTilIlAstutiH by Nilkanthadikshita

File name : chatuHShaShTilIlAstutiH.itx

Category : shiva, nIlakaNThadIkShita

Location : doc_shiva

Proofread by : Rajesh Thyagarajan

Latest update : October 1, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 1, 2022

*sanskritdocuments.org*

# શ્રીનીલકણ્ઠદીક્ષિતપ્રણીતા ચતુઃષષ્ટિલીલાસ્તુતિઃ

શિવલિલાર્ણવતઃ

ક્વ તે દયા વાઙ્મનસાતિભૂમિઃ ક્વ દુર્લભો વા ત્વદવાપ્ત્યુપાયઃ ।
અહો જિતં સુન્દરનાથ! મર્ત્યૈરહો જિતં તત્ર ચ દીનદીનૈઃ ॥ ૧॥

ગુપ્તં વૃથા કોટિભિરાગમાનાં ગુપ્તં વૃથાહો ગુરુભિઃ પુરાણૈઃ ।
કોણે યદત્ર ત્વમિહાનુકમ્પાકોશાલયદ્વારમપાવૃણોષિ ॥ ૨॥

અસ્માભિરજ્ઞાનપિ તારયદ્ભિઃ કિયાન્ પ્રકર્ષો વિબુધેષુ કાર્યઃ ।
ઇતિ ત્વયા ચિન્તયતા કિમીશ! પ્રતારિતા સ્મસ્ત્રિદિવાર્પણેન ॥ ૩॥

પાણ્ડ્યપ્રિયં ત્વાં વિદતી શિવાપિ પાણ્ડ્યાત્મજાસીદ્યદિ કા કથા નઃ ।
પાણ્ડ્યેષુ જાયેમહિ ખઞ્જરીટાઃ કોયષ્ટયઃ કોલકિશોરકા વા ॥ ૪॥

લીલાસુ તે લબ્ધસરૂપભાવા ગ્રામ્યા ઇમે પાણ્ડુષુ ચન્દ્રમૌલે! ।
જિઘ્રન્તિ કેચિદ્ વિલિખન્તિ કેચિચ્ચર્વન્તિ કેચિચ્ચ વતંસમિન્દુમ્ ॥ ૫॥

ત્વં તાવદત્યન્તમૃદુઃ પ્રજાસુ ત્વત્તોઽપિ મૃદ્વી ગૃહિણી તવેયમ્ ।
અધ્યાયતૌ વા ચરતોઃ કિલૈવમાત્મૈકશેષો ભવિતા ધ્રુવં વામ્ ॥ ૬॥

કૈવલ્યદાનાય કૃતપ્રતિજ્ઞૌ કાશીપતિઃ પાણ્ડ્યપતિર્યુવાં દ્વૌ ।
શિષ્યૈકવિશ્રાન્તમમુષ્ય દાનં સાર્વત્રિકં તાવકમેવ શમ્ભો! ॥ ૭॥

વિશ્વસ્ય દીર્ઘાં શ્રવણાદિભઙ્ગી વીતોદ્યમાઃ સ્મશ્ચિરમીશ! મોક્ષે ।
સમ્પ્રત્યવાબુધ્યત વાક્યશેષપઞ્ચાક્ષરીયં મધુરા વિનેતિ ॥ ૮॥

યે યે જના યદ્યદિહાર્થયન્તે તત્તન્નિરસ્તોપધિ તેષુ તેષુ ।
મોમિત્યલોભાદનુજાનતઃ કિમોમિત્યભિખ્યૈવ તવેયમાસીત્ ॥ ૯॥

અન્વેષણીયં કિમનાહતે તે તત્ત્વં હતાઃ સ્મો વયમાગમૌઘૈઃ ।
વિસ્પષ્ટમત્રાહત એવ તત્ત્વં વેત્રેણ પાણ્ડ્યસ્ય યદીક્ષિતં તત્ ॥ ૧૦॥

સ્વરૂપમેતત્ તવ સુન્દરેશ! શુદ્ધા દયેત્યેવ તુ લક્ષયામઃ ।

કદમ્બમૂલન્તુ તટસ્થલક્ષ્મ કારુણ્યસિન્ધો! તવ તર્કયામઃ ॥ ૧૧॥

યદ્ધામસીમાક્રમમાત્ર એવ વૃત્રદ્રુહસ્તત્ કલુષં વિલિલ્યે ।
સકૃદ્ વિગાહ્યૈવ યદીયતીર્થે શાપં મુનેરિન્દ્રગજો મુમોચ ॥ ૧૨॥

નીપાટવીં યઃ કુલશેખરેણ નિર્માપયામાસ ચ રાજધાનીમ્ ।
પ્રાપ્તા શિવા પાણ્ડ્યકુલેઽવતારમનુજ્ઞયા યસ્ય તટાતકેતિ ॥ ૧૩॥

ઉપાયત સ્વં યુધિ જેતુકામામુપાયતસ્તામપિ લીલયા યઃ ।
પતઞ્જલેભક્તિમવેત્ય નૃત્તં પ્રાદર્શયદ્ રૂપ્યસભાન્તરે યઃ ॥ ૧૪॥

કુણ્ડોદરસ્યોદરપૂરણેઽપિ કુણ્ઠોદ્યમા યેન કૃતાન્નપૂર્ણા ।
નાલં પિપાસોપશમાય યસ્ય નદી ચ સા વેગવતી યતોઽભૂત્ ॥ ૧૫॥

સમાહૃતાઃ કાઞ્ચનમાલિકાયાઃ સ્નાનાય યેનામ્બુધયઃ સમસ્તાઃ ।
મહીપતિં યો મલયધ્વજં ચ દિવં ગતં દર્શયતિ સ્મ પત્નીમ્ ॥ ૧૬॥

મીનેક્ષણાયાં સુતમુગ્રપાણ્ડ્યમવાપ યઃ સુન્દરપાણ્ડ્યદેવઃ ।
તસ્મૈ ચ યં શક્તિધરાય વજ્રં ચણ્ડાયુધં ચક્રમપિ વ્યતારીત્ ॥ ૧૭॥

ઉદ્વેલમપ્યર્ણવમુગ્રપાણ્ડ્યો યદ્દત્તયા શોષયતિ સ્મ શક્ત્યા ।
વજ્રેણ મૌલિં બિભિદે મઘોનશ્ચણ્ડાયુધેનાપિ જઘાન મેરુમ્ ॥ ૧૮॥

આચષ્ટ યશ્ચાશયમાગમાનાં જિજ્ઞાસમાનેષુ તપોધનેષુ ।
યદ્દત્તરત્નાહિતમૌલિનૈવ પાણ્ડ્યાર્ભકો રાજપદેઽભિષિક્તઃ ॥ ૧૯॥

કપર્દજૈર્યસ્ય ઘનાઙ્ગનૌઘૈઃ પપે પયોધિઃ પરિજૃમ્ભમાણઃ ।
પ્રાપ્તૈશ્ચ તૈર્યઃ પટમણ્ડપત્વમવારયદ્ વૃષ્ટિમતિપ્રવૃદ્ધામ્ ॥ ૨૦॥

સિદ્ધાત્મના યો વિતતાર સર્વાઃ સિદ્ધીઃ પ્રજાનાં મધુરાનગર્યામ્ ।
યઃ સુન્દરેશાનવિમાનસક્તં શિલાગજઞ્ચાશયદિક્ષુકાણ્ડાન્ ॥ ૨૧॥

અસ્ત્રેણ તુર્યાવતરેણ શૌરર્હસ્તી હતો યેન તથાગતાનામ્ ।
શ્વશ્રૂદુરાલાપવિવાસિતાયા યઃ પ્રાદુરાસીદ્ દ્વિજકન્યકાયાઃ ॥ ૨૨॥

વ્યત્યસ્ય નૃત્તં વિદધે દયાલુઃ પાણ્ડ્યસ્ય યઃ પ્રાર્થનયા મહત્યા ।
પાન્થદ્વિજસ્ત્રીવધપાપવાદં વ્યાજેન યો વ્યાધવટોરહાર્ષીત્ ॥ ૨૩॥

સ્વમાતૃજારં પિતૃઘાતિનં ચ વિપ્રાધમં યો વિમલીચકાર ।
અઙ્ગસ્ય ભાર્યાહરમસ્ત્રશિષ્યમઙ્ગાત્મનૈવાજયદાહવે યઃ ॥ ૨૪॥

માયોરગં યઃ શમયામ્બભૂવ માયાગવીં યસ્ય પુનર્મહોક્ષઃ ।
યઃ પાણ્ડ્યસેનાન્યમનુગ્રહીતું સન્દર્શયામાસ ચમૂં નૃપાલમ્ ॥ ૨૫॥

પાણ્ડ્યાય યઃ પ્રાદિત હેમ યશ્ચ વૈશ્યાઙ્ગનાભ્યો વલમાન્ દયાર્દ્રઃ ।
અષ્ટાપિ સિદ્ધીઃ પ્રતિપાદયન્ યો યક્ષાઙ્ગનાસુ પ્રસસાદ ભૂયઃ ॥ ૨૬॥

દ્વારં સમુદ્ઘાટ્ય નિશિ સ્વયં યશ્ચોલાય સેવામદિશન્નિગૂઢમ્ ।
પાનીયદાનેન ચ પાણ્ડ્યસેનામુજ્જીવ્ય ચોલેન્દ્રમજાપયદ્ યઃ ॥ ૨૭॥

સ્વર્ણં દિશન્ સિદ્ધરસં પ્રયુજ્ય પુપોષ વેશ્યાં શિવધર્મિણીં યઃ ।
પાણ્ડ્યસ્ય યઃ સ્વૈકપરાયણસ્ય સાદી ભવન્ સાધયતિ સ્મ ચોલમ્ ॥ ૨૮॥

અક્ષય્યમપ્યક્ષતમર્પયન્ યો ભક્તાય ભક્તાર્પણમન્વગૃહ્ણાત્ ।
યેનાદૃતો। માતુલરૂપભાજા વૈશ્યો વટુર્ઝતિજનાન્ વિજિગ્યે ॥ ૨૯॥

આસ્થાય યશ્ચાર્જુનનાથલિઙ્ગં પાણ્ડ્યે મહત્ પાતકમુન્મમાર્જ ।
કાષ્ઠાનિ મૂર્ધ્ના કલયન્ ન્યધત્ત કાષ્ઠાં પરાં ગાયતિ યઃ સ્વભક્તે ॥ ૩૦॥

ભદ્રાય ભૂરિ દ્રવિણં દિદેશ પુત્રં દદૌ ચેરમહીભુજે યઃ ।
ભદ્રાય દિવ્યં ફલકં દિદેશ વૃષ્ટૌ મહત્યામપિ ગાયતે યઃ ॥ ૩૧॥

દ્વીપાન્તરીયામવમાપિ ગીત્યા ભદ્રા વિજિગ્યે યદનુગ્રહેણ ।
વારાહમાસ્થાય વપુર્દદૌ યઃ સ્તન્યામૃતં કોલકિશોરકાણામ્ ॥ ૩૨॥

પ્રાપય્ય માનુષ્યકમદ્ભુતં યઃ પાણ્ડ્યસ્ય તાન્ મન્ત્રિપદેઽભ્યષિઞ્ચત્ ।
યઃ ખઞ્જરીટં શરણં પ્રપન્નં ચક્રે બલિભ્યો બલિનં ખગેભ્યઃ ॥ ૩૩॥

જહાર કોયષ્ટિમનુગ્રહીતું યાદાંસિ યઃ કાઞ્ચનપઙ્કજિન્યાઃ ।
કલ્પાન્તલુમાં કટકાહિના યઃ સીમા વિવત્રે મધુરાનગર્યાઃ ॥ ૩૪॥

પ્રાદ્રાવયત્ પાણ્ડ્યકૃતેઽરિસેનાં બાણૈઃ સ્વનામાક્ષરલાઞ્છિતૈર્યઃ ।
દુરાસદં દુષ્કવિભિઃ સ્ક્ત્યં યઃ પ્રાદાદ્ વિચિત્રં ફલકં કવીનામ્ ॥ ૩૫॥

પાણ્ડ્યસ્ય ચિન્તાનુગુણં નિબધ્ય પદ્યં દદૌ યશ્ચ નિજાર્ચકાય ।
વિદ્યાવિવાદે વિહિતાતિવાદં કીરં કવિં યઃ પુનરન્વગૃહ્ણાત્ ॥ ૩૬॥

અપિ સ્વયં કુમ્ભભવેન યસ્તમબોધયદ્ દ્રામિડસૂત્રતત્ત્વમ્ ।
વ્યવેચયન્મૂકમુખેન યશ્ચ તત્તત્કૃતા દ્રામિડસૂત્રવૃત્તીઃ ॥ ૩૭॥

ભક્તે કવૌ ક્વાપિ વિમાનનેન પાણ્ડ્યાય કુપ્યન્નગરાદ્યયૌ યઃ ।
દાશો ભવન્ દાશકુલેઽવતીર્ણાં જગ્રાહ પાણૌ જગદામ્બિકાં યઃ ॥ ૩૮॥

આચાર્યમૂર્તિં પરિગૃહ્ય નમ્રમદીક્ષયદ્ વાતપુરીશ્વરં યઃ ।
અદર્શયદ્ યસ્તુરગાન્ સૃગાલાનભ્યર્થિતો વાતપુરીશ્વરેણ ॥ ૩૯॥

પ્રાવર્તયદ્ વેગવતીમથૈનં પાણ્ડ્યેન યઃ પાલયિતું નિરુદ્ધમ્ ।
વિશ્વાત્મતા યો વિશદીચકાર વેત્રાહતિં સ્વાં ભુવને વિવૃણ્વન્ ॥ ૪૦॥

સમ્બન્ધનાથસ્ય મુખાદકાર્ષીચ્છાન્તં જ્વરં પાણ્ડ્યમહીપતેર્યઃ ।
વિદ્યાવિવાદે વિજિતાનનેન યઃ શૂલમારોપયતિ સ્મ બૌદ્ધાન્ ॥ ૪૧॥

આનીય યઃ કૂપશમીમહેશાન્ વૈશ્યાવિવાહે વિવવાર સાક્ષ્યમ્ ।
લીલાસ્વનન્તાસ્વપિ યસ્ય દૃષ્ટા લીલા ચતુષ્ષષ્ટિરિયં પુરાણે ॥ ૪૨॥

આલમ્બમેકં જગતાં ત્રયાણામવ્યાજકારુણ્યસુધાનિધાનમ્ ।
તં તાદૃશં ત્વામપહાય શમ્ભો! કિં તાવદન્યૈરિહ કિમ્પચાનૈઃ ॥ ૪૩॥

ઇતિ શ્રીનીલકણ્ઠદીક્ષિતપ્રણીતા શિવલીલાર્ણવાન્તર્ગતા
ચતુઃષષ્ટિલીલાસ્તુતિઃ સમાપ્તા ।

Proofread by Rajesh Thyagarajan

*chatuHShaShTilIlAstutiH by Nilakantha Dikshita*

pdf was typeset on October 1, 2022

Please send corrections to *sanskrit@cheerful.com*